न वा पुनः। भित्तेर्द्विगुणतो वापि कर्तव्या मण्डपाः क्वचित्। प्रासादे मञ्जरी कार्य्या चित्रा विषमभूमिका। परिमाणनिरोधेन रेखा वैषम्यभूमिका। आधारस्तु चतुर्द्वारश्चतुर्मण्डपशोभितः। शतश्टङ्गसमायुक्तो मेरुप्रासाद उत्तमः। मण्डपास्तस्य कर्तव्या भद्रैस्त्रिभिरलङ्कृताः। घटनाकारमानानां भिन्ना भिन्ना भवन्ति ये। कियन्तोयेषु साधारानिराधाराश्च केचन। प्रतिच्छन्दक्रमेदेन प्रासादाः सम्भवन्ति ते। अन्योन्यसङ्करात्तेषां घटना नामभेदतः। देवतानां विशेषाय प्रासादा बहवः स्मृताः। प्रासादे नियमो नास्ति देवानां च स्वयम्भुवाम्। तान्येव देवतानाञ्च पूर्बमानेन कारयेत् — चतुरस्त्रायतास्तत्र चतुष्कोणसमन्विताः। चन्द्रशालान्विताः कार्य्या भेरीशिखरसंयुता। पुरतो वाहनानाञ्च कर्तव्या लघुमण्डपाः। नाव्यशाला च कर्तव्या द्वारदेशसमाश्रया। प्रासादा देवतानाञ्च कार्य्या दिक्षु विदिक्ष्वपि। द्वारपालाश्च कर्तव्या मुख्याङ्गत्वात् पृथक् पृथक्। किञ्चिद्विदूरतः कार्य्या मठास्तत्रोपजीविनाम्। प्रावृता जगती कार्य्या फलपुष्पजलान्विता। प्रासादेषु सुरान् स्थाप्य पूजाभिः पूजयेन्नरः। वासुदेवे सर्वदेवान् स्वर्गभाक् तद्गृहादिकृत्"

प्रासादसामान्यलक्षणमुक्तमग्निपुराणे १०४अ० यथा

"ईश्वर उवाच वक्ष्ये प्रासादसामान्यलक्षणं ते शिखिध्वज!। चतुर्भागीकृते क्षेत्रे भित्तेर्भागेन विस्तरात्। अद्रिभागेण गर्भः स्यात् पिण्डिका पादविस्तरात्। पञ्चभागीकृते क्षेत्रे द्वान्तर्भागेतु पिण्डिका। सुषिरं भागविस्तीर्णं भित्तयो भागविस्तरात्। भागौ द्वौ मध्यमे गर्भे ज्येष्ठभागद्वयेन तु। त्रिभिस्तु कन्यसोगर्भः शेषो भित्तिरिति क्वचित्। षोढाभक्तेऽथ वा क्षेत्रे भित्तिर्भागैकविस्तरात्। गर्भो भागेन विस्तीर्णो भागद्वयेन पिण्डिका। विस्ताराद्द्विगुणो वापि सपादद्विगुणोऽपि वा। अर्द्धार्द्धद्विगुणो वापि त्रिगुणः क्वचिदुच्छ्रयः। जगती विस्तरार्द्धेन त्रिभागेण क्वचिद्भवेत्। नेमिः पादोनविस्तीर्णा प्रासादस्य समन्ततः। परिधिस्तृतीयांशको मध्ये रथकांस्तत्र कारयेत्। चामुण्डभैरवं तेषु नाव्येशं च निवेशयेत्। प्रासादार्द्धेन देवानामष्टौ वा चतुरोऽपि वा। प्रदक्षिणं बहिः कुर्यात् प्रासादादिषु वा न वा। आदित्याः पूर्वतः स्थाप्याः स्कन्दोऽग्निर्वायुगोचरे। एवं यमादयो न्यास्याः स्वस्यां स्वस्यां दिशि स्थिताः। चतुर्द्धा शिखरं कृत्वा शुकनासा द्विभागिका। तृतीये वेदिका तस्मै सकण्ठा मलसारकः। वैराजः पुष्पकश्चान्यः कैलासो मालकस्तथा। त्रिविष्टपश्च पञ्चैव मेरुमूर्द्ध नि संस्थिताः। चतुरस्त्रस्तु तत्राद्यो द्वितीयोऽपि तदायतः। वृत्तो वृत्तायतश्चान्यो श्चाष्टास्रश्चापि पञ्चमः। एकैको नवधा भेदैश्चत्वारिंशच्च पञ्च च। प्रासादः प्रथमो मेरुर्द्वितीयो मन्दरस्तथा। विमानश्च तथा भद्रः सर्वतोभद्र एव च। रुचको नन्दको नन्दिवर्द्धनश्च तथापरः। श्रीवत्सश्चेति वैराजान्वयाये च समुत्थिताः। बलभी गृहराजश्च शालागृहञ्च मन्दिरम्। विशालश्च तथा ब्रह्ममन्दिरं भुवनन्तथा। उत्तम्भः शिविका वेश्म नवैते पुष्पकोद्भवाः। बलयो दुन्दुभिः पद्मो महापद्मक एव च। वर्द्धनो वान्य उष्णीषः शङ्खश्च कलसस्तथा। स्वपूरवृक्षकश्चान्योः वृत्ताः कैलाससम्भवाः। गजोऽथ वृषभो हंसो गरुत्मान् सिंहनामकः। भूमुखो भूधरश्चान्यः श्रीजयः पृथिवीधरः। वृत्तायतात् समुद्भूता नवैते मालकाह्वयात्। वज्रं चक्रं तथा चान्यत् स्वस्तिकं वज्रस्वस्तिकम्। चित्रं स्वस्तिकखड्गञ्च गदा श्रीवृक्ष एव च। विजयो नामतश्चैते त्रिविष्टपसमुद्भवाः। नगराणामिमाः सञ्ज्ञा लाटादीनामिमास्तथा। ग्रीवार्द्धेनोन्नतश्चूलं पृथुलञ्च विभागतः। दशधा वेदिकां कृत्वा पञ्चभिः स्कन्धविस्तरः। त्रिभिः कण्ठं तु कर्तव्यं चतुर्भिस्तु तदण्डकम्। दिक्षु द्वाराणि कार्य्याणि न विदिक्षु कदाचन। पिण्डिका कोणविस्तीर्णा मध्यमान्ता ह्युदाहृता। क्वचित् पञ्चमभागेन महतां गर्भपादतः। उच्छ्राया द्विगुणास्तेषामन्यथा वा निगद्यते। षष्ठ्याधिकात् समारभ्य अङ्गुलानां शतादिह। उत्तमान्यपि चत्वारि द्वाराणि दशहानितः। त्रीण्येव मध्यमानि स्युस्त्रीण्येव कन्यसान्यतः। उच्छ्रायार्द्धेन विस्तारो ह्युच्छ्रायोऽभ्यधिकस्त्रिधा। चतुर्भिरष्टभिर्वापि दशभिरङ्गुलैस्ततः। उच्छ्रायात् पादविस्तीर्णा विशाखास्तदुदुम्बरे। विस्तरार्द्धेन बाहुल्यं सर्वेषामेव कीर्तितम्। द्विपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्टदम्। अधःशाखा चतुर्थांशे प्रतीहारौ निवेशयेत्। मिथुनैरथ-बल्लीभिः शाखाशेषं विभूषयेत्। स्तम्भविद्धेऽष्टयता स्यात् वृक्षविद्धे त्वभूतिता। कूपविद्धे भयं मृगदृक्षविद्धे धनक्षयः। प्रासादगृहशालादिमार्गविद्धेषु बन्धनम्। सभाविद्धे तु दारिद्र्यं वर्णविद्धे निराकृतिः। उलूखले च दारिद्र्यं शिलाविद्धे तु शत्रुता। छायाविद्धे